# कलयामि रघुरामम्

## रागम्ः बेगड  ताळम्ः मिश्र चापु

(*श्री स्वाति तिरुनाळ् विरचित*)

पल्लवि

कलयामि रघुरामम् भूप ललामम्

अनुपल्लवि

नीलोत्पलसन्निभगात्रं परमपवित्रम्

चरणम्

धनदानुज घनवनदहनं तप्त-

कनकनिभवसनं वनजाक्षम्

सनकादिमुनिविनुत शुभचरितं
मनसिजरूपं अनवद्यम् ॥ १ ॥

करुणावारिनिधिं चरणनलिनपूत-

वरतापसमहिळं सुरपालम्

कुरुविन्दनिभरदं परमपुरुषमिह
धरणी नन्दिनीकेळीपरमीशम् ॥ २ ॥

द्युमणिकुलतिलकं विमलगुण सर्व-

शमलहरण चणं रमणीयम्

कुमुदैकबान्धव समवदनं श्री
कमलाभं घनशोभम् ॥ ३ ॥

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇